प्रतिबिम्बाकारपरिणामो युक्तिसहः चक्षुर्नासिकादि निम्नोन्नतभावस्य स्पर्शेनानुपलम्भात् । समतलमेव हि पाणिना स्पृश्यते । समतलेन व्यवहितं मुखमिति चेत् । तर्हि चाक्षुषमपि न स्यात् । तत एतत्सिद्धम् । विमत आदर्शमुखव्यक्त्यन्तररहितः तज्जन्मकारणशून्यत्वात् । यथा विषाणजन्मकारणशून्यं विषाणरहितं शशमस्तकमिति । ननु तर्हि शुक्तिरजतवन्मिथ्यात्वापत्तेर्न बिम्बैकत्वसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत् । विषमोऽयं दृष्टान्तः नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजताभिज्ञाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् इह तु न तथा नेदं मुखमिति स्वरूपबाधः किन्तु नात्र मुखमिति देशसम्बन्धमात्रबाधे सत्यतो मदीयमेव मुखमिति प्रत्यभिज्ञा कथं भ्रमःस्यात् । न च स्वमुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यम् नासाग्रादिकतिपयावयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः । यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात् । ननु तत्त्वमसिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यः स्थाणुरसौ पुरुष इति वद्बाधायां सामानाधिकरण्यात् संसार्यविनाशे च मोक्षानुपपत्तेः । मैवम् सोऽयं देवदत्त इति वदैक्यपरत्वेनापि सामानाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः । अत एव जीवस्य बन्धे मोक्षस्य पुरुषार्थत्वात् । यस्तु मन्यते प्रतिबिम्ब एव नास्ति, दर्पणप्रतिस्फालिता नेत्ररश्मयः परावृत्य बिम्बमेव दर्पणाद्विविक्तं गृह्णन्तीति, स्पष्टप्रत्यङ्मुखत्वाद्यनुभवेनैवासौ निराकरणीयः । कथं तर्हि मूर्त्तद्रव्यस्य मुखस्यैकस्य विच्छिन्नदेशद्वये युगपत् कार्त्स्न्येन वृत्तिः । दर्पणदेशवृत्तेर्मायाकृतत्वादिति ब्रूमः । न हि मायायामसम्भावनीयं नाम स्वशिरश्छेदादिकमपि स्वप्ने माया दर्शयति । नन्वेवमेव जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरस्थवृक्षेणैक्ये सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वं चाध्यस्तमिति वक्तव्यम् । न चात्राध्यासहेतुरस्ति । अधिष्ठानस्य साकल्येन प्रतीतेस्तत्कथमसावध्यासः । उच्यते । किमत्र हेत्वावरणाभावादध्यासाभावः ? किं वा दोषाभावात् । उतोपादानाभावात् ? आहोस्विदध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात् ? । नाद्यः । चैतन्यावरणस्यैवाध्यासोपादानतया जडे पृथगावरणानुपयोगात् । एतेन तृतीयोऽपि निरस्तः । न द्वितीयः । सोपाधिकभ्रमेषूपाधेरेव दोषत्वात् । न चतुर्थः । निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात् । तर्हि सोपाधिकभ्रमस्य कर्त्तृत्वादेर्नात्मतत्त्वज्ञानान्निवृत्तिः किन्तु अहङ्कारोपाध्यपगमादिति चेत् । बाढम् । पारमार्थिकदर्पणाद्युपाधिस्तत्कृतभ्रमस्य च ज्ञानादनिवृत्तावप्यज्ञानजन्योपाधेरहङ्कारस्य निरुपाधिकभ्रमरूपस्यात्मतत्त्वज्ञानान्निवृत्तौ कर्त्तृत्वादेर्ज्ञानान्निवृत्तिरर्थात् सिध्यति" ।

परिभाषायां तु उपाधिसन्निकर्षस्थले भ्रममेवाङ्गीचकार न तु तत्र मिथ्यात्वमिति भेदः । "तत्र सङ्केतवन्नाम सैव संज्ञेति कीर्त्त्यते । नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्विदा" इति संज्ञा त्रिधा विभज्य । "उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी । औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते" इति "यद्वाधुनिकसङ्केतशालित्वात् पारिभाषिकम् । जात्या नैमित्तिकं शक्तमौपाधिकमुपाधिना" । "यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकं यथाकाशपरशब्दादि" इति च शब्दप्र० । अत्र उपाधिना शक्तेरवच्छेदकत्वात् तत्कृतत्वम् इति बोध्यम् ।

**उपाधेय** त्रि० उप+आ+धा-कर्मणि यत् । १अभिनिवेशनीये २आरोप्ये ३उपाधिना विशेष्ये च । "उपाधेयसङ्करेऽपि उपाधेरसङ्करात्" जगदी० ।

**उपाध्याय** पु० उपेत्याधीयतेऽस्मात् उप+अधि+इङ्-घञ् । "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापके । स्त्रियां ङीपि उपाध्याया उपाध्यायीतिरूपद्वयम् । उपाध्यायस्य पत्न्यर्थे ङीष् आनुक् वा उपाध्यायानी "उपाध्यायानी ऋतुमती" भा० आ० ३अ० उपाध्यायी च । "उपाध्यायान् दशाचार्य आचार्याणां शतं पिता" । "आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्" मनुः । तन्मरणे एकरात्राशौचम् "आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसहाध्यायिशिष्येष्वेकरात्रेण" विष्णूक्तेः ।

**उपानस्** त्रि० उपगतमनः शकटं पितरं वा अत्या० समा० । १शकटसदृशे २पितृसदृशे पितृव्यादौ च । जातौ अच् समा० । उपानस शकटसदृशे कृष्णमयादौ शकटे आकारेव्यङ्ग्यतयाऽस्य जातित्वम् । वेदे तु पुंस्त्वमपि "सचायोरिन्द्रश्चकर्ष उपानसः" ऋ०१०,१०५,४,